*Journal of Advances and Scholarly Researches in Allied Education*
*Vol. 15, Issue No. 12, December-2018, ISSN 2230-7540*

# “न बहुव्रीहौ” इति सूत्रसमीक्षणम्

**Kuldeep Singh***

Research Scholar, Department of Theology, Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth, New Delhi

***सार – युस्मदस्मदोर्बहुव्रीहिसमासे चिकीर्षिते “त्वकं पिता यस्य” “अहमहं पिता यस्य” इत्यर्थे बहुव्रीहेः सुबन्तसमुदायनिमित्तकत्वे बहिरङ्गत्वात् अज्ञाताद्यर्थविवक्षायाम् “अव्ययसर्वनामकच्प्राक्टेः”[1] इति सूत्रेण विधीयमानस्याकचः सुबन्तद्वयानिमित्तकत्वेनानन्तरङ्गतयः अज्ञातः कुत्सितो वा अहं त्वच इत्यर्थे अकच्प्रत्यये कृते “युस्मकद् सु पितृ सु” इति दशायां बहुव्रीहिसमासे त्वकत्पितृकः मकत्पितृक इति रूपं प्राप्नोति इष्यते तु त्वत्कपितृकः मत्कपितृकः। अतः इष्टरूपसिद्धयर्थं भगवता पाणिनिना सूत्रमुक्तं “न बहुव्रीहौ”[2] इति। इदं द्विपदात्मकं सूत्रम्। सूत्रार्थस्तु बहुव्रीहिसमासे चिकीर्षिते सर्वनामसंज्ञकानि न भवन्ति इति।***

---------------------------------x---------------------------------

बहुव्रीहौ चिकीर्षिते सर्वनामत्वं नेति “न बहुव्रीहौ” इति सूत्रे भवतां जिज्ञासा स्यात् यत् बहुव्रीहिसमासः अन्यपदार्थप्रधानः, समासघटकपदानामुपसर्जनत्वेन “संज्ञोपसर्जनीभूतास्तु न सर्वादयः” इति निषेधात् सर्वनामसंज्ञायाः अप्राप्त्या सूत्रेण तन्निषेधो व्यर्थः स्यात्। क्चि बहुव्रीहिसंज्ञायाः प्राक् बहुव्रीहिसंज्ञार्थे कल्पितेऽलौकिकविग्रहवाक्ये सर्वनामसंज्ञायाः निषेधो न स्यात्। अतः अत्र सूत्रे चिकीर्षिते इति पदमध्याह्रियते। तथा सति सूत्रार्थो जायते बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात्। एव्च बहुव्रीहिसमासात् प्रागेव “युष्मद् सु पितृ सु” “अस्मद् सु पितृ सु इति अलौकिकविग्रहवाक्ये एव सर्वनामसंज्ञा निषिध्यते। अतः अकच्प्रत्ययो न भवति, अपि तु कप्रत्यय एव। ननु अत्र सूत्रे चिकीर्षते इति पदाध्याहारे किं मानमिति चेदुच्यते चिकीर्षिते इति पदाध्याहारे ‘न बहुव्रीहौ’ इति सूत्रमेव मानम्। अन्यथा बहुव्रीहिसमासे अन्यपदार्थस्य प्रधानतया युष्मदादीनामुपसर्जनीभूतार्थबोधकत्वेन सर्वनामत्वाप्राप्त्या सर्वनामसंज्ञायाः निषेधवैयर्थ्यं स्पष्टमेव। अनेन सूत्रेण यदि अलौकिकविग्रहवाक्येसर्वनामसंज्ञायाः निषेधो न कृतः स्यात् तथा सति अलौकिकविग्रहवाक्ये सर्वनामनिमित्तकत्वेन प्रवृत्तोऽकच्प्रत्ययः समासेऽपि श्रूयेत् तस्य श्रवणं तु नेष्टमिति कृत्वा लौकिकविग्रहे एव सर्वनामसंज्ञानिषेधो भवति अलौकिकविग्रहवाक्ये युष्मदादीनामुपसर्जनत्वाभावेन सर्वनामसंज्ञायाः प्राप्तिरिति। अतस्तन्निषेधार्थं ननु अलौकिकविग्रहवाक्ये बहुव्रीहिसमासात्प्राक् उपसर्जनत्वाभावेऽपि बहुव्रीहौ परिनिष्ठते रूपे उपसर्जनत्वस्य भावितया इत्यर्थिकया “अकृतव्यूहाः पाणिनियाः”[3] इति परिभाषायाः सर्वनामसंज्ञायाः अप्राप्त्या तन्निषेधार्थं कृतस्य “न बहुव्रीहौ” इति सूत्रस्य वैयर्थ्यं स्यादिदिति चेत् प्रोच्यते “न बहुव्रीहौ” इति सूत्रारम्भसामर्थ्याद् ‘अकृतव्यूहाः पाणिनियाः’ इति परिभाषायाः अनित्यत्वं ज्ञाप्यते। तथा च परिभाषायाः अनित्यत्वादियं परिभाषा बहुव्रीहिसमासे सर्वनामसंज्ञाविषये न प्रवर्तते।

## अतिभवकान् इति

अकृतव्यूहाः पाणिनियाः इति परिभाषायाः इति परिभाषायाः अनित्यत्वज्ञापनस्य फलं वर्तते अतिभवकान् इति प्रयोगस्य सिद्धिः। तथा हि भवकन्तम् अतिक्रान्तः = अतिभवकस्तान् = अतिभवकान्। अत्रातिभवकान् इति शब्देन भवत्कर्मकातिक्रमणकर्ता इति बोधो जायते। अस्मिन् बोधे भवत्पदार्थस्यातिक्रमणकर्तरि विशेषणत्वं वर्तते। तथा सति अलौकिकविग्रहवाक्येऽपि भवच्छब्दस्य सर्वनामसंज्ञा न स्यात्, यतः अनुपसर्जनत्वस्य भाविविनाशकतया अकृतव्यूहपरिभाषया सर्वनामत्वाभावबोधनात् तथा सति अकच्प्रत्ययो न स्यात्, वा समासे श्रूयेत्।

‘च्छ्वो शूडनुनासिके चेति’[4] सूत्रे सलुग्ग्रहणम् अकृतव्यूहपरिभाषायाः अनित्यत्वे ज्ञापकम् ‘च्छ्वोः सूडनुनासिके च’ इति सूत्रे तुग्विशिष्टस्य घस्य राविधानमपि अकृतव्यूहपरिभाषायाः अनित्यत्वोमानमाः। तथाहि - घे च इति सूत्रेण घकारं निमित्तीकृत्य तुग् विधीयते। दस्य शादेरो कृते अकृतव्यूहपरिभाषायाः तुको निवृत्तौ सिद्धायां तुग्विशिष्टस्य घस्य राविधानं व्यर्थीभूय परिभाषायाः अनित्यत्वे ज्ञापकं

www.ignited.in

भवति। कुत्र परिभाषायाः नित्यत्वं, कुत्र वा अनित्यत्वमिति लक्ष्यानुरोधेन व्यवस्था ज्ञेया।

भगवता भाष्यकारेण त्वं पिता यस्य सः, अहं पिता सः इत्यद्यर्थे बहुव्रीहिसमासे त्वकत्पितृकः मकत्पितृकः इत्यादेरकज्घटितस्यैव साधुत्वं प्रतिपाद्य "न बहुव्रीहौ" इति सूत्रं प्रत्याख्यातम्।

अत्रायं विवेकः कर्तव्यः- भाष्यकारमते त्वकत्पितृक इत्यादेरकज्घटितस्य साधुत्ववत् सूत्रकारमतेऽपि अकज्घटितस्यैव साधुत्वं यतः बहुव्रीहिः सर्वनामसंज्ञको न भवतीत्यर्थ गत्वा अवयवस्य सर्वनामत्वसत्त्वेनाकच् स्यादेवेत्याशयो भाष्यकारस्य। सूत्रकारमतेऽपि बहुव्रीहौ इत्यत्र यदि प्रथमार्थे सप्तमी स्वीक्रियते। तदा बहुव्रीहिः सर्वनामसंज्ञको न भवतीत्येव सूत्रार्थः स्यात्। तथा चावयवस्य सर्वनामसंज्ञायाः सत्त्वादकच्प्रत्ययः स्यादेव एव्च सूत्रकारमतेऽपि त्वकत्पितृकः मकत्पितृक इत्यादिप्रयोगाः साधवः सन्ति एव।

## यथोत्तरं मुनीनां प्रामाण्यम्

विषयाभावे मतभेदे वा उत्तरोत्तरमुनीनां प्रामाण्यं स्वीक्रियते। एव्च सूत्रकारापेक्षया वार्तिककारस्य, वार्तिककारापेक्षया भाष्यकारस्य प्रामाण्यं वर्तते। यथा प्राकृते भगवता भाष्यकृता त्वकत्पितृक इत्यस्यैव साधुत्वं प्रतिपादितं सूत्र्च प्रत्याख्यातम् तर्हि सूत्रवार्तिककारमतेऽपि बहुव्रीतिसमासे त्वकत्पितृक इत्यादेः अकज्घटितस्यैव साधुत्वं स्वीकार्यम्, सूत्रस्य लौकिकप्रयोजनाभावश्चाङ्गीकार्यः यथोत्तरं मुनीनां प्रामाण्यात्। अत्रेदं विचारणीयं यत् पूर्व-पूर्वमुन्यपेक्षया उत्तरोत्तरमुनीनां प्रामाण्यं यदि पूर्वोक्तवचने बोध्येत तर्हि पूर्वपूर्वमुनीनामप्रमाण्यापत्तिस्तथा सति भगवतः पाणिनेः भ्रान्तत्वं प्रसज्येत्। अतः पूर्वपूर्वमुन्यभिप्रेतेऽर्थे उत्तरोत्तरमुनीनां तात्पर्यमित्येव परिभाषार्थः स्वीकार्यः।

## प्राचीनमतोपस्थानम्

प्राचीनाः आचार्याः "न बहुव्रीहौ" इति सूत्रे सर्वादीनि सर्वनामानीति सूत्रमनुवत्र्य बहुव्रीहौ सर्वादेः सर्वनामसंज्ञा न स्यात् इत्यर्थः वर्णितवन्तः। अस्योदाहरणं तु प्रियसर्वाय, अत्र प्रियः सर्वो यस्य असौ- प्रियसर्वस्तस्मै प्रियसर्वायेति बहुव्रीहिसमासः अस्मिन् बहुव्रीहिसमासावयवस्य सर्वशव्दस्य सर्वनामसंज्ञायाः निषेधात् ङे प्रत्ययस्य स्थाने स्मै इत्यादेशो न भवति। एव्च 'न बहुव्रीहौ' इति सूत्रमारभमाणस्य सूत्रकारस्य मते बहुव्रीहिसमासे सर्वनामसंज्ञा न भवति। भाष्यकारास्तु सर्वादीनि इत्यत्रैकशेषं स्वीकृत्य स्वाद्यर्थवाचकस्य सर्वादिगणपठितस्य सर्वादेः सर्वनामसंज्ञा न भवति न्यासकृतस्तु- यदि न बहुव्रीहौ इति सूत्रन्न स्यात्तर्हि त्वत्कपितृकः मत्कपितृकः इत्यादौ बहुव्रीहिसमासावयवयोर्युस्मदस्मदोः सर्वनामसंज्ञायाः सत्त्वात् 'अव्ययसर्वनाम्नामकच् प्राक् टेः'[5] इति सूत्रेण विधीयमानस्याकचोऽवङ्गकार्यत्वेनाकच्प्रत्ययः स्यात् तन्निवृत्यर्थमिदं सूत्रमारम्भणीयं, तथा सति सर्वनामत्वाभावादकच् न भवत्यपितु कप्रत्यय एव भवति

## प्राचीनतमतखण्डनम्

प्राचीनैः यद् व्याख्यातं तत्र समीचीनं, यतो हि तेषान्नये 'न बहुव्रीहौ' इति सूत्रस्य किं बहुव्रीहौ सर्वनामसंज्ञा न भवति इत्यर्थः विवक्षित उत बहुव्रीहिसमासावयवानां सर्वादिशब्दानां सर्वनामसंज्ञा न भवतीति वा। अत्र यदि प्रथमोऽर्थः स्वीक्रियते तर्हि तैः उक्तेन "समासावयवयोर्युस्मदस्मदोः सर्वनामत्वन्नेति" ग्रन्थेन सह विरोधः स्यात्। क्ि‍च बहुव्रीहिसंज्ञकस्य प्रियसर्वादेः सर्वादिगणे पाठाभावेन सर्वनामसंज्ञायाः प्राप्तिरेव नास्ति अतस्तान्निषेधो नावश्यक एव न च "सर्वादीनि सर्वनामानि" इति सूत्रे शब्दस्वरूपविशेष्यमादाय 'येन विधिस्तदन्तस्येति'[6] सूत्रेण तदन्तविधौ सर्वाद्यन्तानां सर्वनामसंज्ञा प्राप्ता, अतस्तान्निषेधार्थं सूत्रमावश्यकमिति चेन्न, बहुव्रीहिसमासे अवयवानां सर्वादिशब्दानामुपसर्जनतया सर्वादि बहिर्भावेन तदन्तस्य सर्वनामसंज्ञा प्राप्ते दुर्वचत्वात्। अस्मादेव कारणात् अर्थात् अवयवानामुपसर्जनत्वेन सर्वादिबहिर्भावात् द्वितीयपक्षोऽपि न युक्तः।

ननु संज्ञोपसर्जनप्रतिषेध इति वार्तिककृतोक्तमतस्तेषां नये उपसर्जनानां संज्ञा मास्तु किन्तु सूत्रकृता तु तथाविधं किमपि सूत्रं न विरचितमतः सूत्रकारमते उपसर्जनस्याऽपि सर्वनामसंज्ञाप्राप्ता सूत्रसार्थक्यमिति चेन्न, सर्वेषां नाम सर्वनामेति सर्वनामसंज्ञाया अन्वर्थतास्वीकारेण सूत्राक्षरैरेव संज्ञोपसर्जन प्रतिषेध इति वार्तिकार्थलाभः सम्भवत्येवातः सूत्रकारमतेऽपि उपसर्जनस्य संज्ञानिषेधः भवत्येव।

यत्तु संज्ञोपसर्जनप्रतिषेध इति वार्तिककृतोक्तत्वात् सूत्रवार्तिकारयोर्मत भिन्न-भिन्नं प्रतीयते यथा देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेन न पश्यति इत्यर्थो गम्यते तद्वदेव वार्तिककृता विशिष्य वार्तिकमुक्तमत एतेषां मतं सूत्रकारमतेऽपि सर्वेषां नाम सर्वनामेति अन्वर्थसंज्ञाबलेन गौणस्य सर्वनामसंज्ञा नेष्टा वार्तिकारमते तु साक्षात् वार्तिकेन गौणस्य सर्वनामसंज्ञायाः निषिद्धत्वात् गौणस्य न सर्वनामसंज्ञा। एव्चोभयोर्मते गौणस्य सर्वनामसंज्ञाभाव एवेष्टः, अतो न मतभेदः।

'तत्तु त्वत्कपितृक इत्यादि' इति पङ्क्तेराशयः केचन प्राचीना आचार्याः त्वत्कपितृक इत्यादि प्रयोगसिद्धयर्थं वदन्ति यत् त्वं पिता यस्य, अहं पिता यस्येति विग्रहानन्तरं बहुव्रीहिसमासे

www.ignited.in

कृते समासावयवस्य युष्मदशब्दस्यास्मच्छब्दस्य च सर्वाद्यर्थवाचकत्वेन युष्मदस्मदोः सर्वनामसंज्ञकत्वात् कुत्सितार्थविवक्षायाम् अज्ञातार्थविवक्षायां वा "अव्ययसर्वनाम्नामकच् प्राक् टेः" इति सूत्रेणाकच्प्रत्ययः प्रसज्येत, अङ्गाधिकारपठितत्वाभावेन यथा स्मै-प्रभृत्यादेशानाङ्गसंज्ञापेक्षत्वं तद्वेदवाकचप्रत्ययस्यापि अङ्गाधिकारीयत्वाभावेन अङ्गसंज्ञानपेक्षत्वात् एव्च सूत्रार्थाभावे त्वकत्पितृक इत्यनिष्टं रूपं प्रसज्येत् तद्वारणाय सूत्रमारब्धम् स्वोक्तार्थे प्रमाणत्वेन न्यासकारस्यापि मतं प्रादशर्यत्। न्यासकारस्यायमाशयः त्वकत्पितृक इत्यादौ अन्वर्थसंज्ञाबलेन सर्वनामसंज्ञाभावे बोधिते अकच्प्रत्ययो न भविष्यति इति प्रतिपाद्यसमुदाये एकार्थीभावशक्त्यडीकारेण समुदायस्यान्यपदार्थविशेषणत्वेऽपि अवयवस्यान्यपदार्थविशेषात्वान्नस्यैत्येव इति उक्तम् एतत् सर्वं श्रीमता दीक्षितेन खण्डितं, तच्च "एतत्सर्वं प्रामादिकमेवेति पङ्क्तेः व्याख्यानावसरे व्यक्तीभविष्यति।

## एतत्सर्वं प्रामादिकमेवेति ग्रन्थस्य भावः

द्विविधा वृत्तिर्भवति जहत्स्वार्था अजहत्स्वार्था च पदानि स्वार्थं जहति यस्यां वृत्तौ सा वृत्तिः जहत्स्वार्था वृत्तिः। न जहति पदानि स्वार्थं यस्यां वृत्तौ सा अजहत्स्वार्था वृत्तिः। समासे यदि जहत्स्वार्था वृत्तिः स्वीक्रियते तदा समुदायस्यैवार्थवत्त्वेन समासावयवानामर्थवत्त्वं नास्त्येव। अजहत्स्वार्थावृत्तिस्वीकारेऽपि समासावयवार्थस्यान्यपदार्थविशेषणतयोप- स्थित्योपसर्जनत्वं स्पष्टमेव। एव्च प्राचीनैर्यदुक्तं समासावयवो समासान्तः पातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेन कुत्सिताद्यर्थविवक्षायां "अव्ययसर्वनाम्नामकच् प्राक् टेः" इति सूत्रेणाकच्प्रत्ययः स्यात्, तद्वारणार्थं सूत्रमिदमिति, तत् पक्षद्वयेऽपि अर्थात् जहत्स्वार्थ-वृत्तिपक्षे, अजहत्स्वार्थावृत्तिस्वीकारेऽपि समासावयवार्थस्यान्यपदार्थविशेषणतयोपस्थित-योपस्थित्योपसर्जनत्वं स्पष्टमेव। एव्च प्राचीनैर्यदुक्तं समासावयवो समासान्तपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेन कुत्सिताद्यर्थविवक्षायां "अव्ययसर्वनाम्नामकच् प्राक् टेः" इति सूत्रेणाकच्प्रत्ययः स्यात्, तद्वारणार्थं सूत्रमिदमिति, तत् पक्षद्वयेऽपि अर्थात् जहत्स्वार्थ-वृत्तिपक्षे, अजहत्स्वार्थवृत्तिपक्षे वा असङ्गतमेव न्यासकृताऽपि, "समुदाये एकार्थीभावाडीकारेण समुदायस्यान्यपदार्थोपसर्जनत्वेऽपि" अवयवस्य नोपसर्जत्वमितितात्पर्यकं "समुदायो हि विशेषे वर्तते पूर्वपदन्तु सर्वार्थतया अनपेतमेव" इत्युक्तं तदपि पक्षद्वये व्याहतमेव। किञ्च प्राचीनानां मते अतिसर्वाय इत्यादौ स्मायादेशो दुर्वारः स्यात् यतोहि "पदाङ्गाधिकारे तस्य च तदन्तस्य च" इत्यनया परिभाषया तदन्तग्रहणात् "सर्वनाम्नः स्मैः"[7] इति सूत्रस्यार्थः स्यात्- "अदन्तो यः सर्वनामजनकस्तदन्तात् परस्य ङः स्मै इत्यादेशः स्यात्" इति। तथा च प्राचीनोक्तरीत्या सर्वशब्दस्य सर्वार्थवाचकत्वेन सर्वनामसंज्ञायाः सत्त्वात् अतिसर्वायेत्यादौ स्मायादेशापत्तिः। नहि पूर्वपदेस्वार्थता, उत्तरपदे न स्वार्थता इति वक्तुं युक्तं, तादृशार्थकरणे कस्याश्चिदुक्तेरभावात्। अपि च गौणत्वे सर्वादीनां सर्वार्थवाचकत्वन्नास्तीति स्वग्रन्थेन सह विरोधश्च स्यात्।

"यदपि व्याचख्युः त्वं पिता यस्य इत्यादौ" पंक्तेराशयः केचन आचार्या अकथयन् यत् त्वं पिता यस्येत्यादौ विग्रहवाक्ये प्राप्ता सर्वनामसंज्ञा 'न बहुव्रीहौ' इति सूत्रेण निषिध्यते इति। तदपि न युक्तियुक्तः यतो हि विग्रहावयवयमित्यनेन किं विवक्षितं, लौकिकविग्रहवाक्यमलौकिकविग्रहवाक्यं वा। यदुच्यते विग्रहवाक्यमित्यनेन लौकिकविग्रहवाक्यमलौकिकविग्रहवाक्यं वा। यदुच्यते विग्रहवाक्यमित्यनेन लौकिकविग्रहवाक्यमेव विवक्षितं तर्हि "प्रक्रिया वाक्येऽयं निषेधो न तु लौकिके" इति कैयटग्रन्थेन सह भवता विरोधः स्यादतो लौकिकविग्रहवाक्यं ग्रहीतुं न शक्यते।

किञ्च प्रकृतसन्दर्भगतपूर्वापरस्वग्रन्थविरोधोऽपि स्यात्। यदि विग्रहवाक्यमित्यनेन अलौकिकविग्रहवाक्यविवक्षितमिति विभाव्यते तर्हि युष्मद् सु पितृ सु इति विग्रहवाक्ये प्राप्ता संज्ञा निषिध्यते इत्येव वक्तव्यतया त्वं पिता यस्येत्यादौ विग्रहवाक्ये प्राप्ता संज्ञा निषिध्यते इत्येव वक्तव्यतया त्वं पिता यस्येत्यादौ विग्रहवाक्ये प्राप्ता संज्ञा निषिध्यते इति कथनमसङ्गतं स्यात्।

"यदपि व्याचख्युः नन्वतिसर्वादौ" इत्यादिपङ्क्तेराशयः प्रासादकृतः न्यासकारस्य मतं वर्णयन्तो व्याचख्युर्यत् अतिसर्वायेत्यादौ सर्वनामसंज्ञा न प्रवर्तत एव इति तत्र किं विनिगमकमिति जिज्ञासायामाह "त्वकपितृको मत्कपितृक इत्यादौ समासावयवयोर्युस्मदस्मदोः सर्वनामत्वादनङ्गकायत्वेनाकच्, स 'मा भूत, क प्रत्यय एव स्यादित्येतदर्थमिदं सूत्रम्"। अस्मिन् न्यासग्रन्थे अङ्गशब्दः समुदायवाचकः। अतः अतिसर्वाय इत्यत्र अङ्गस्य संज्ञा अपेक्षिता अदन्तात् सर्वनाम्नोऽङ्गात् परस्य ङेः स्थाने स्मायादिविधानात् अवयवमात्रस्य सत्यामपि सर्वनामसंज्ञायां न दोषस्तस्याङ्गत्वाभावात्।

समुदाये च अन्यपदार्थं प्रति सर्वादेर्विशेषणत्वात् अतिसर्वायेत्यादौ तदन्तस्य सर्वनामसंज्ञा न भवति त्वत्कपितृक इत्यादौ तु अवयवमात्रस्य सर्वनामसंज्ञेष्टा न तु समुदायस्य अवयवश्च स्वार्थमात्रप्रधान इति अतिप्रसङ्गः

www.ignited.in

स्यादतस्तद्वारणाय 'न बहुव्रीहौ' इति सूत्रमिति न्यासकाराणामाशयः।

प्रसादकृदुक्तिखतण्डनम्- प्रसादकारस्य कथनन्नैव समीचीनं, यतो हि 'पदांगाधिकारे तस्य च तदन्तस्य चे' त्यनया परिभाषया तदन्तविधेः सर्वसम्मतत्वेनावयवमात्रस्य सत्यामपि सर्वसंज्ञायां दोषो नास्तीत्युक्तेव्याहतत्वात्। क्चि स्वग्रन्थे एवोक्तम्- 'अङ्गाधिकारपरिभाषया स्मै इत्यादेशः स्यादिति- 'अनेन ग्रन्थेन साकं स्वोक्तिविरोधश्च स्यात्। यदि न्यासग्रन्थस्य आशयान्तरमुच्यते यत् प्राक् प्रवृत्ता संज्ञा अर्थान्तरोपसङ्क्रमेऽपि उपगता, अतः अतिसर्वाय इत्यादौ त प्रतिषेधः इति वार्तिकेन संज्ञायाः निषेधात्, एतादृशाशयश्चेत् यथा प्राक्प्रवृत्ता संज्ञा अर्थान्तरोपसङ्क्रमे सति गच्छति तथा सर्वनामत्वाभावात् अकच्प्रत्ययोऽपि गच्छतु तथा सति अकच्प्रसङ्गाभावेन सूत्रं व्यर्थमेव स्यात्। ननु कार्यकालपक्षे स्मै इत्याद्यादेशार्थं पुनः सर्वनामसंज्ञा चापेक्षिता सा च न सम्भवतीत्याशय इति चेत् एतादृशाशयः प्रकृतग्रन्थस्य न सम्भवति न्यासकारैस्तथाशयकग्रन्थस्य अनुक्तत्वात्।

'यदपि व्याचख्युः अङ्गमप्रधानम्' इत्यस्याः पङ्क्तेराशयः केचन आचार्याः न्यासग्रन्थस्य व्याख्यानं कृतवन्तो यत् अङ्गाधिकारीयं कार्यमप्रधानम्, आङ्गं कार्यं प्रधानन्तथा च प्रधानाप्रधानयोः प्रधाने एव कार्यं बाधित्वा प्रधानं कार्यं स्यात्तथा च कप्रत्ययप्रधानत्वेन तं बाधित्वापवादत्वात् अकच् स्यादित्यर्थोऽभिप्रेतो न्यासकृता इति। किन्त्वेतादृशार्थवर्णनं न समीचीनं, क्लिष्टत्वात्, व्यर्थत्वात्, न्यासग्रन्थासम्मतत्वाच्च। तथाहि त्वत्कपितृको मत्कपितृक इति वृत्तिग्रन्थस्य व्याख्यानानन्तरं न्यासकारेणोक्तं यत् सर्वेषान्नाम सर्वनामेति अन्वर्थसंज्ञाकरणादेव सर्वनामसंज्ञायाः अभावे बोधितोऽकच् प्रत्ययो न भविष्यति।

न ह्यत्र स्वार्थता सम्भवति समासावयवार्थस्यान्यपदार्थविशेषणत्वात् इति कथनान्तरमुक्तं यत् समुदायो हि विशेषे वर्तते, पूर्वपदन्तु सर्वार्थतायाः अनपेतमेव (अस्याः पङ्क्तेः व्याख्यानम् पूर्वं कृतम्) भवतु तर्हि अनयोस्त्वत्कपितृकमत्कपितृकयोरेतत् सूत्रप्रविषयता। क्चि सर्वनामसंज्ञायाः अन्वर्थास्वीकारेण प्रियविश्वायेत्यादौ न सर्वनामसंज्ञा प्रवर्तते यतो हि प्रियविश्वादयः सर्वेषान्नामानि न विद्यन्ते। तद-वयवानामपि अनर्थकत्वेन सर्वनामसंज्ञायाः आभावात् न क्चित् सर्वनामकार्यं प्रवर्तते। स्मैप्रभृत्यादेशानामङ्गकार्यत्वात्, तथा च प्रियविश्वशब्दघटकविश्वशब्दस्याङ्गसंज्ञाभावात् ततः परस्य ङेः न स्मायादेशः इति व्याख्यायोक्तवन्तो यत् त्वत्कपितृको मत्कपितृक इत्यादौ अकच्प्रत्ययो न स्यादेतदर्थमारब्धव्यं सूत्रं तथा च प्रियविश्वायेत्यदावपि स्पष्टप्रतिपत्तये 'न बहुव्रीहौ' इति सूत्रेण विश्वादीनां सर्वनामसंज्ञा निषिध्यते। अनेन न्यासग्रन्थेनाङ्गसंज्ञानपेक्षत्वमेवार्थं प्राप्यते। किन्तु प्रसादकारैः स्वकल्पितव्याख्यायां न्यासकारमतं दरीकृतम्।

'यद्यपि व्याचख्युः सूत्रवार्तिककृतो मतम्' इत्यस्याशयः केचन आचार्याः प्रसादकारस्य मतं समर्थनं कर्तुं भजितवन्तो यत् यद्यपि पूर्वोक्तमतं सूत्रवार्तिककृतोरेव तथापि सूत्रवार्तिककारयोर्मतम् न्यासकारेण व्याख्यातमतो न्यासकारमतमिदमुच्यते न्यासकारेण व्याख्यातत्वात्। अतो न्यासकारस्य मतमिदमिति यत् प्रसादकृतोक्तं तत् समीचीनमेव। इत्यमपि व्याख्यायां श्रीमान् दीक्षितः खण्डयति।

दीक्षितः कथयति यत् वार्तिकार एतादृशार्थस्य स्पर्शनमपि न कृतवान्। अतः वार्तिककारस्येदं मतमिति न युक्तम्। क्चि न्यासकृता वृत्तिग्रन्थव्यख्यानावसरे समासे कृते सतीत्यापि वदता पूर्वोक्तार्थस्य परित्यक्तत्वेन तद्व्याख्यानस्याभावाच्च।

यदप्याहुः न्यासकृच्छब्देन इत्यस्याशयः केचिदाचार्याः प्रसादकारस्य मतसमर्थनाय वदन्ति यत् न्यासकृच्छब्देन सूत्रकारस्यैव ग्रहणं विवक्षितमतः सूत्रकारमते अङ्गसंज्ञानपेक्षत्वरूपार्थस्य सत्त्वाद् ग्रन्थविरोधः व्याख्यानासङ्गतिर्वा नायाति। इदं व्याख्यानमपि न समीचीनं, यतो हि यदि न्यासकृच्छब्दस्य सूत्रकार इत्यर्थः स्यात् तर्हि "सूत्रकारमते बहुव्रीहौ न सर्वनामतो इति ग्रन्थस्य वैयर्थ्यं स्यात् यतः न्यासकृच्छब्दद्वारा सूत्रकारस्य मतं यदि प्रदर्शितं तर्हि पुनः सूत्रकारस्य मतप्रदर्शनमयुक्तमेव। अतो न्यासकृच्छब्देन सूत्रकारस्य ग्रहणं कर्तुं न शक्यते। क्चि सूत्रकारमते बहुव्रीही न सर्वनामता" इति कथनानन्तरमुक्तं यत् "भाष्यकारमते गौणत्वामात्रे"। एव्च यदि न्यासकृच्छब्देन सूत्रकार उच्यते तर्हि भाष्यकारमते इति ग्रन्थे न्यास्यार्थस्य विच्छेदः स्यात्। अत्र व्याख्यानान्तरमिदमेव निश्चीयते यत् प्राचीनानां प्रक्रियाग्रन्थाः तद् व्याख्यातृग्रन्थाश्चापाततः अयुक्ता एव।

प्रक्रियाग्रन्थानुकूलं विवेचनं पूर्वस्मिन् भागे प्रक्रियाकौमुदीकारस्य मतं भाष्यविरुद्धमिति प्रतिपादितम्, किन्तु यदि प्रक्रियाकारस्य ग्रन्थोऽपि कथ्चिद् भाष्यविरोधेन व्याख्यायतामित्याग्रहोऽस्ति तर्हि तस्य ग्रन्थस्यैवं व्याख्या कार्या यत् प्रियविश्वायेत्यत्र सर्वनामसंज्ञानिषेधार्थं "न बहुव्रीहौ" इति सूत्रन्नावश्यकं यतः विश्वशब्दस्यान्यपदार्थविशेषणत्वेन गौणतया सर्वनामेति महासंज्ञाकरणसामर्थ्यमेव सर्वनामसंज्ञा न भविष्यति अतः प्रक्रियाकौमुदीकारो निष्कर्षमाह- सूत्रकारमते बहुव्रीहौ चिकीर्षिते सर्वनामता न भाष्यकारमते सूत्रस्य प्राख्यातत्वात् गौणत्वमात्रे सर्वनामसंज्ञा न भवतीति गौणत्वमात्रे इत्यत्र मात्र शब्दोऽवधारणार्थे विद्यते। तेन

www.ignited.in

गौणत्वम् एव सर्वनामसंज्ञा निषेधो न तु ततः प्राग् भवति एव´्च गौणत्वमात्रे सर्वनामसंज्ञायाः अभावे बोधिते 'न बहुव्रीहौ' इति सूत्रस्य नावश्यकता। अतो भाष्यकृता सूत्रं प्रत्याख्यातम्। न्यासकारस्य मतन्तु अत्यन्तं तुच्छं वर्तते यतः आचार्येण यथा व्याख्यानं कृतं तद्विपरीतमेव न्यासकृता व्याख्यातम् इत्याशयेनैव प्रक्रियाकारेणोक्तं त्वत्कपितृक इत्यादि। इमानि सर्वाण्यपि मतानि प्राचीनतत्तद्ग्रन्थपरिशीलनशालिभिः विद्वद्भिः विचारयितव्यानि इत्येवं प्रकारेण साररूपेण विषयोऽयं मया समीक्षितः।

## सन्दर्भ ग्रन्थ सूची

1. पा.सू. 5.3.71

2. पा.सू. 1.1.29

3. प्रि.33

4. पा.सू. 6.4.19

5. पा.सू. 5.3.71

6. पा.सू. 1.1.72

7. पा.सू. 7.1.14

---

**Corresponding Author**

**Kuldeep Singh***

Research Scholar, Department of Theology, Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth, New Delhi